# ऋग्वेदः - मण्डल १०

## इन्द्रः, ७,१३,२३ ऐन्द्रो वृषाकपिः, २-६, ९-१०, १५-१८ इन्द्राणी ।



**Exported from Wikisource on ७ नवंबरमासः २०२४**

इन्द्रः, ७,१३,२३ ऐन्द्रो वृषाकपिः, २-६, ९-१०, १५-१८ इन्द्राणी।

दे. इन्द्रः। पङ्क्तिः

वृषाकपिसूक्तम्

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत ।

यत्रामदद्वृषाकपिरर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः

॥१ ॥

परा हीन्द्र धावसि वृषाकपेरति व्यथिः ।

नो अह प्र विन्दस्यन्यत्र सोमपीतये विश्वस्मादिन्द्र

उत्तरः ॥२ ॥

किमयं त्वां वृषाकपिश्चकार हरितो मृगः ।

यस्मा इरस्यसीदु न्वर्यो वा पुष्टिमद्वसु विश्वस्मादिन्द्र

उत्तरः ॥३ ॥

यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।

श्वा न्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः

॥४ ॥

प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ।

शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र

उत्तरः ॥५ ॥

न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ।

न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र

उत्तरः ॥६ ॥

उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति ।

भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति

विश्वस्मादिन्द्र उत्तरः ॥७ ॥

किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ।

किं शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र

उत्तरः ॥८ ॥

अवीरामिव मामयं शरारुरभि मन्यते ।

उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र

उत्तरः ॥९ ॥

संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।

वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र

उत्तरः ॥१० ॥

इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।

नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः

॥११ ॥

नाहमिन्द्राणि रारण सख्युर्वृषाकपेरृते ।

यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र

उत्तरः ॥१२ ॥

वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।

घसत्त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र

उत्तरः ॥१३ ॥

उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् ।

उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र

उत्तरः ॥१४ ॥

वृषभो न तिग्मशृङ्गोऽन्तर्यूथेषु रोरुवत् ।

मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिन्द्र

उत्तरः ॥१५ ॥

न सेशे यस्य रम्बतेऽन्तरा सक्थ्या कपृत् ।

सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र

उत्तरः ॥१६ ॥

न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।

सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या कपृद्विश्वस्मादिन्द्र

उत्तरः ॥१७ ॥

अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।

असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र

उत्तरः ॥१८ ॥

अयमेमि विचाकशद्विचिन्वन्दासमार्यम् ।

पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र

उत्तरः ॥१९ ॥

धन्व च यत्कृन्तत्रं च कति स्वित्ता वि योजना ।

नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः

॥२० ॥

पुनरेहि वृषाकपे सुविता कल्पयावहै ।

य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः

॥२१ ॥

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन ।

क्व स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र

उत्तरः ॥२२ ॥

पर्शुर्ह नाम मानवी साकं ससूव विंशतिम् ।

भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिन्द्र

उत्तरः ॥२३॥

## सायणभाष्यम्

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अष्टमाष्टकस्य चतुर्थोऽध्याय आरभ्यते । तत्र 'वि हि ' इति त्रयोविंशत्यृचं द्वितीयं सूक्तम् । वृषाकपिर्नामेन्द्रस्य पुत्रः । स चेन्द्राणीन्द्रश्चैते त्रयः संहताः संविवादं कृतवन्तः । तत्र 'वि हि सोतोरसृक्षत ' : किं सुबाहो स्वङ्गुरे ' ' इन्द्राणीमासु नारिषु ' इति द्वे ' उक्ष्णो हि मे ' ' अयमेमि' इति चतस्र इत्येता नवर्च इन्द्रवाक्यानि । अतस्तासामिन्द्र ऋषिः । ' परा हीन्द्र ' इति पञ्च ' अवीराम् ' इति द्वे ' वृषभो न तिग्मशृङ्गः' इत्याद्याश्चतस्र इत्येकादशर्चं इन्द्राण्या वाक्यानि । अतस्तासामिन्द्राण्यृषिः । ' उवे अम्ब ' ' वृषाकपायि रेवति ' • पशुर्ह नाम ' इति तिस्रो वृषाकपेर्वाक्यानि । अतस्तासां वृषाकपिर्ऋषिः । सर्वं सूक्तमैन्द्रं पञ्चपदापङ्क्तिच्छन्दस्कम् । तथा चानुक्रान्तं -- वि हि त्र्यधिकैन्द्रो वृषाकपिरिन्द्राणीन्द्रश्च समूदिरे पाङ्त्ुम् ' इति । षष्ठेऽहनि ब्राह्मणाच्छंसिन उक्थ्यशस्त्र एतत्सूक्तम् । सूत्रितं च ---- ' अथ वृषाकपिं शंसेद्यथा होताज्याद्यां चतुर्थे ' ( आश्व. श्रौ. ८. ३) इति । यदि षष्ठे ःहन्युक्थ्यस्तोत्राणि द्विपदासु न स्तुवीरन्

सामगा यदि वेदमहरग्निष्टोमः स्यात्तदानीं ब्राह्मणाच्छंसी माध्यंदिने सवन आरम्भणीयाभ्यः ऊर्ध्वमेतत्सूक्तं शंसेद्विश्वजित्यपि । तथा च सूत्रितं -- सुकीर्तिं ब्राह्मणाच्छंसी वृषाकपिं च पङ्क्तिशंसम् ' (आश्व. श्रौ. ८. ४) इति ।।

वि हि सोतो॒रसृ॑क्षत॒ नेन्द्रं॑ दे॒वमं॑मंसत ।

यत्रामं॑दद्वृ॒षाक॑पिर॒र्यः पु॒ष्टेषु॒ मत्स॑खा॒ विश्व॒स्मा॒दिन्द्र॒ उत्त॑रः ॥१

वि । हि । सोतोः॑ । असृ॑क्षत । न । इन्द्र॑म् । दे॒वम् । अ॒मं॒स॒त॒ ।

यत्र॑ । अमं॑दत् । वृ॒षाक॑पिः । अ॒र्यः । पु॒ष्टेषु॑ । मत्ऽस॑खा ।
विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥१

वि । हि । सोतोः । असृक्षत । न । इन्द्रम् । देवम् । अमंसत ।

यत्र । अमदत् । वृषाकपिः । अर्यः । पुष्टेषु । मत्ऽसखा ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१

"सोतोः सोमाभिषवं कर्तुं "वि "असृक्षत । यागं प्रति मया विसृष्टा अनुज्ञाताः स्तोतारो वृषाकपेर्यष्टारः । “हि इति पूरणः । तत्र "देवं द्योतमानम् "इन्द्रं मां “न “अमंसत । मया प्रेरिताः सन्तोऽपि ते स्तोतारो न स्तुतवन्तः । किंतु मम पुत्रं वृषाकपिमेव स्तुतवन्तः । "यत्र येषु “पुष्टेषु सोमेन प्रवृद्धेषु यागेषु "अर्यः स्वामी “वृषाकपिः मम पुत्रः मत्सखा मम सखिभूतः सन् “अमदत् सोमपानेन हृष्टोऽभूत् । यद्यप्येवं तथापि “इन्द्रः अहं "विश्वस्मात् सर्वस्माज्जगतः "उत्तरः उत्कृष्टतरः। माधवभट्टास्तु वि हि सोतोरित्येषर्गिन्द्राण्या वाक्यमिति मन्यन्ते। तथा च तद्वचनम् । इन्द्राण्यै कल्पितं हविः कश्चिन्मृगोऽदूदुषदिन्द्रपुत्रस्य

वृषाकपेर्विषये वर्तमानः । तत्रेन्द्रमिन्द्राणी वदति । तस्मिन्पक्षे त्वस्या ऋचोऽयमर्थः । सोतोः सोमाभिषवं कर्तुं वि ह्यसृक्षत । उपरतसोमाभिषवा आसन् यजमाना इत्यर्थः । किंच मम पतिमिन्द्रं देवं नामंसत स्तोतारो न स्तुवन्ति । कुत्रेति अत्राह । यत्र यस्मिन् जनपदे पुष्टेषु प्रवृद्धेषु धनेष्वर्यः स्वामी वृषाकपिरमदत् । मत्सखा मत्प्रियश्चेन्द्रो विश्वस्मात् सर्वस्माज्जगत उत्तरः उत्कृष्टतरः ॥

परा॒ हीन्द्र॒ धाव॑सि वृ॒षाक॑पे॒रति॒ व्यथि॑ः ।

नो अह॒ प्र विन्द॑स्य॒न्यत्र॒ सोम॑पीतये॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥२

परा॑ । हि । इ॒न्द्र॒ । धाव॑सि । वृ॒षाक॑पेः । अति॑ । व्यथिः॑ ।

नो इति॑ । अह॑ । प्र । वि॒न्द॒सि॒ । अ॒न्यत्र॑ । सोम॑ऽपीतये । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥२

परा । हि । इन्द्र । धावसि । वृषाकपेः । अति । व्यथिः ।

नो इति । अह । प्र । विन्दसि । अन्यत्र । सोमऽपीतये । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२

हे “इन्द्र त्वम् "अति अत्यन्तं “व्यथिः चलितः "वृषाकपेः वृषाकपिं “परा “धावसि प्रतिगच्छसि । "अन्यत्र "सोमपीतये सोमपानाय “नो "अह नैव च “प्र “विन्दसि प्रगच्छसीत्यर्थः । सोऽयम् "इन्द्रः "विश्वस्मात् "उत्तरः ॥ ।

किम॒यं त्वां वृ॒षाक॑पिश्च॒कार॒ हरि॑तो मृ॒गः ।

यस्मा॑ इर॒स्यसी॒दु॒ न्व१॒॑र्यो वा॑ पुष्टि॒मद्वसु॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥३

Padapatha Devanagari Accented

किम् । अ॒यम् । त्वाम् । वृ॒षाक॑पिः । च॒कार॑ । हरि॑तः । मृ॒गः ।

यस्मै॑ । इ॒र॒स्यसि॑ । इत् । ऊँ॒ इति॑ । नु । अ॒र्यः । वा॒ । पु॒ष्टि॒ऽमत् ।
वसु॑ । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥३

किम् । अयम् । त्वाम् । वृषाकपिः । चकार । हरितः । मृगः ।

यस्मै । इरस्यसि । इत् । ऊं इति । नु । अर्यः । वा । पुष्टिऽमत् ।
वसु । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥३

हे इन्द्र “त्वां प्रति "हरितः हरितवर्णः "मृगः मृगभूतः "अयं वृषाकपिः। मृगजातिर्हि वृषाकपिः । "किं प्रियं "चकार अकार्षीत् । "यस्मै वृषाकपये "पुष्टिमत् पोषयुक्तं "वसु धनम् "अर्यो “वा उदार इव स त्वं "नु क्षिप्रम् “इरस्यसीत् प्रयच्छस्येव । यः "इन्द्रः “विश्वस्मात् "उत्तरः ॥

यमि॒मं त्वं वृ॒षाक॑पिं प्रि॒यमि॑न्द्राभि॒रक्ष॑सि ।

श्वा न्व॑स्य जम्भिष॒दपि॒ कर्णे॑ वराह॒युर्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥४

यम् । इ॒मम् । त्वम् । वृ॒षाक॑पिम् । प्रि॒यम् । इ॒न्द्र॒ । अ॒भि॒ऽरक्ष॑सि ।

श्वा । नु । अ॒स्य॒ । ज॒म्भि॒ष॒त् । अपि॑ । कर्णे॑ । व॒रा॒ह॒ऽयुः ।
विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥४

यम् । इमम् । त्वम् । वृषाकपिम् । प्रियम् । इन्द्र । अभिऽरक्षसि ।

श्वा । नु । अस्य । जम्भिषत् । अपि । कर्णे । वराहऽयुः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥४

हे "इन्द्र "त्वं "प्रियम् इष्टं पुत्रं "यमिमं "वृषाकपिम् "अभिरक्षसि परिपालयसि "अस्य एनं वृषाकपिम् । द्वितीयार्थे षष्ठी । "वराहयुः वराहमिच्छन् "श्वा "नु क्षिप्रं "जम्भिषत् भक्षयतु । "अपि च "कर्णे गृह्णात्विति शेषः । श्वानो हि वराहमिच्छन्ति । सिद्धमन्यत् ॥

प्रि॒या त॒ष्टानिं मे क॒पिर्व्यंक्ता॒ व्यंदूदुषत् ।

शिरो॒ न्वंस्य राविषं॒ न सुगं दु॒ष्कृतें भुवं॒ विश्वंस्मा॒दिन्द्र॒ उत्तंरः ॥५

प्रि॒या । त॒ष्टानिं । मे॒ । क॒पिः । विऽअंक्ता । वि । अ॒दू॒दु॒ष॒त् ।

शिरः॑ । नु । अ॒स्य॒ । रा॒वि॒ष॒म् । न । सु॒ऽगम् । दुः॒ऽकृतें । भु॒व॒म् । विश्वंस्मात् । इन्द्रः॑ । उत्ऽतंरः ॥५

प्रिया । तष्टानि । मे । कपिः । विऽअक्ता । वि । अदूदुषत् ।

शिरः । नु । अस्य । राविषम् । न । सुऽगम् । दुःऽकृते । भुवम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥५

"मे मह्यमिन्द्राण्यै "तष्टानि यजमानैः कल्पितानि "प्रिया प्रियाणि "व्यक्ता व्यक्तान्याज्यैर्विशेषेणाक्तानि हवींषि कश्चित् वृषाकपेर्विषये वर्तमानः "कपिः "व्यदूदुषत् दूषयामास । ततोऽहम् "अस्य तत्कपिस्वामिनो वृषाकपेः "शिरो "नु क्षिप्रं "राविषं

लुनीयाम् । "दुष्कृते दुष्टस्य कर्मणः कर्त्रे वृषाकपयेऽस्मै "सुगं सुखं न "भुवम् अहं न भवेयम् । अस्मै सुखप्रदात्री न भवामीत्यर्थः । अस्या मम पतिः “इन्द्रः “विश्वस्मात् "उत्तरः ॥ ॥१ ॥

न मत्स्त्री सुंभसत्तंरा न सुयाशुंतरा भुवत् ।

न मत्प्रतिंच्यवीयसी न सक्थ्युद्यंमीयसी विश्वंस्मादिन्द्र उत्तंरः ॥ ६

न । मत् । स्त्री । सुभसत्ऽतंरा । न । सुयाशुंऽतरा । भुवत् ।

न । मत् । प्रतिंऽच्यवीयसी । न । सक्थिं । उत्ऽयंमीयसी । विश्वंस्मात् । इन्द्रः । उत्ऽतंरः ॥६

न । मत् । स्त्री । सुभसत्ऽतरा । न । सुयाशुऽतरा । भुवत् ।

न । मत् । प्रतिऽच्यवीयसी । न । सक्थि । उत्ऽयमीयसी । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥६

“मत् मत्तोऽन्या "स्त्री नारी "सुभसत्तरा अतिशयेन सुभगा "न "भुवत् न भवति । नास्तीत्यर्थः । किंच मत्तोऽन्या स्त्री "सुयाशुतरा अतिशयेन सुसुखातिशयेन सुपुत्रा वा "न भवति । तथा च मन्त्रान्तरं -- ददाति मह्यं यादुरी याशूनां भोज्या शता' (ऋ. सं. १. १२६. ६) इति । किंच “मत् मत्तोऽन्या “प्रतिच्यवीयसी पुमांसं प्रति शरीरस्यात्यन्तं च्यावयित्री “न अस्ति । किंच मत्तोऽन्या स्त्री “सक्थ्युद्यमीयसी संभोगेऽत्यन्तमुत्क्षेप्त्री “न अस्ति । न मत्तोऽन्या काचिदपि नारी मैथुनेऽनुगुणं सक्थ्युद्यच्छतीत्यर्थः । मम पतिः "इन्द्रः "विश्वस्मात् "उत्तरः उत्कृष्टः ॥

उ॒वे अ॑म्ब सुलाभिके॒ यथे॑वा॒ङ्ग भ॑वि॒ष्यति॑ ।

भ॒सन्मे॑ अम्ब॒ सक्थि॑ मे॒ शिरो॑ मे॒ वी॑व हृष्यति॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥७

उ॒वे । अ॒म्ब॒ । सु॒ला॒भि॒के॒ । यथा॑ऽइव । अ॒ङ्ग । भ॒वि॒ष्यति॑ ।

भ॒सत् । मे॒ । अ॒म्ब॒ । सक्थि॑ । मे॒ । शिरः॑ । मे॒ । वि॑ऽइव । हृ॒ष्य॒ति॒ । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥७

उवे । अम्ब । सुलाभिके । यथाऽइव । अङ्ग । भविष्यति ।

भसत् । मे । अम्ब । सक्थि । मे । शिरः । मे । विऽइव । हृष्यति । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥७

एवमिन्द्राण्या शप्तो वृषाकपिर्ब्रवीति । “उवे इति संबोधनार्थो निपातः । हे "अम्ब मातः “सुलाभिके शोभनलाभे त्वया "यथैव येन प्रकारेणैवोक्तं तथैव तत् "अङ्ग क्षिप्रं "भविष्यति भवतु । किमनेन त्वदनुप्रीतिकारिणा ग्रहेण मम प्रयोजनम् । किंच "मे मम पितुः त्वदीयो “भसत् भग उपयुज्यताम् । किंच मम पितुस्त्वदीयं "सक्थि चोपयुज्यताम् । किंच "मे मम पितरमिन्द्रं त्वदीयं "शिरः च प्रियालापेन “वीव यथा कोकिलादिः पक्षी तद्वत् “हृष्यति हर्षयतु । मम पिता “इन्द्रः "विश्वस्मात् “उत्तरः ॥

किं सु॑बाहो स्वङ्गुरे॒ पृथु॑ष्टो॒ पृथु॑जाघने ।

किं शू॑रपत्नि न॒स्त्वम॒भ्य॑मीषि वृ॒षाक॑पिं॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥८

किम् । सु॒बा॒हो॒ इति॑ सुऽबाहो । सु॒ऽअ॒ङ्गु॒रे॒ । पृथु॑स्तो॒ इति॑ पृथु॑ऽस्तो । पृथु॑ऽजघने ।

किम् । शू॒र॒ऽप॒त्नि॒ । नः॒ । त्वम् । अ॒भि । अ॒मी॒षि॒ । वृ॒षाक॑पिम् । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥८

किम् । सुबाहो इति सुऽबाहो । सुऽअङ्गुरे । पृथुस्तो इति पृथुऽस्तो । पृथुऽजघने ।

किम् । शूरऽपत्नि । नः । त्वम् । अभि । अमीषि । वृषाकपिम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥८

क्रुद्धामिन्द्र उपशमयति । हे “सुबाहो हे शोभनबाहो "स्वङ्गुरे शोभनाङ्गुलिके “पृथुष्टो पृथुकेशसंघाते “पृथुजघने विस्तीर्णजघने "शूरपत्नि वीरभार्ये हे इन्द्राणि “त्वं "नः अस्मदीयं “वृषाकपिं “किं किमर्थम् "अभ्यमीषि अभिक्रुध्यसि । एकः किंशब्दः पूरणः । यस्य पिता “इन्द्रः अहं “विश्वस्मात् "उत्तरः ॥

अ॒वी॒रामि॑व मा॒म॒यं श॒रारु॑र॒भि म॑न्यते ।

उ॒ताहम॑स्मि वी॒रिणीन्द्र॑पत्नी म॒रुत्स॑खा॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥९

अ॒वीरा॑म्ऽइव । माम् । अ॒यम् । श॒रारुः॑ । अ॒भि । म॒न्य॒ते॒ ।

उ॒त । अ॒हम् । अ॒स्मि॒ । वी॒रिणी॑ । इन्द्र॑ऽपत्नी । म॒रुत्ऽस॑खा । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥९

अवीराम्ऽइव । माम् । अयम् । शरारुः । अभि । मन्यते ।

उत । अहम् । अस्मि । वीरिणी । इन्द्रऽपत्नी । मरुत्ऽसखा । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥९

पुनरिन्द्रमिन्द्राणी ब्रवीति । "शरारुः घातुको मृगः "अयं वृषाकपिः "माम् इन्द्राणीम् "अवीरामिव "अभि "मन्यते विजानाति । "उत अपि च "इन्द्रपत्नी इन्द्रस्य भार्या "अहम् इन्द्राणी "वीरिणी पुत्रवती "मरुत्सखा मरुद्भिर्युक्ता च "अस्मि भवामि । यस्या मम पतिः "इन्द्रः "विश्वस्मात् "उत्तरः ॥

संहोत्रं स्मं पुरा नारी समंनं वावं गच्छति ।

वेधा ऋतस्यं वीरिणीन्द्रंपत्नी महीयते विश्वंस्मादिन्द्र उत्तंरः ॥१०

सम्ऽहोत्रम् । स्म । पुरा । नारीं । समंनम् । वा । अवं । गच्छति ।

वेधाः । ऋतस्यं । वीरिणीं । इन्द्रंऽपत्नी । महीयते । विश्वंस्मात् । इन्द्रंः । उत्ऽतंरः ॥१०

सम्ऽहोत्रम् । स्म । पुरा । नारी । समनम् । वा । अव । गच्छति ।

वेधाः । ऋतस्य । वीरिणी । इन्द्रऽपत्नी । महीयते । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१०

"नारी स्त्री "ऋतस्य सत्यस्य "वेधाः विधात्री "वीरिणी पुत्रवती "इन्द्रपत्नी इन्द्रस्य भार्येन्द्राणी "संहोत्रं स्म समीचीनं यज्ञं खलु "समनं संग्रामं "वा। समितिः समनम्' इति संग्रामनामसु पाठात् । "अव प्रति "पुरा "गच्छति । "महीयते

स्तोतृभिः स्तूयते च । तस्या मम पतिः “इन्द्रः "विश्वस्मात्
"उत्तरः ॥ ॥ २ ॥

इ॒न्द्रा॒णीमा॒सु नारि॑षु सु॒भगा॑म॒हम॑श्रवम् ।

न॒ह्य॑स्या अप॒रं च॒न ज॒रसा॒ मर॑ते॒ पति॒र्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥११

इ॒न्द्रा॒णीम् । आ॒सु । नारि॑षु । सु॒ऽभगा॑म् । अ॒हम् । अ॒श्र॒व॒म् ।

न॒हि । अ॒स्याः॒ । अ॒प॒रम् । च॒न । ज॒रसा॑ । मर॑ते । पतिः॑ ।
विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥११

इन्द्राणीम् । आसु । नारिषु । सुऽभगाम् । अहम् । अश्रवम् ।

नहि । अस्याः । अपरम् । चन । जरसा । मरते । पतिः ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥११

अथेन्द्राणीमिन्द्रः स्तौति । "आसु सौभाग्यवत्तया प्रसिद्धासु "नारिषु स्त्रीषु स्त्रीणां मध्ये “इन्द्राणीं “सुभगां सौभाग्यवतीम् "अहम् इन्द्रः “अश्रवम् अश्रौषम् । किंच “अस्याः इन्द्राण्याः “पतिः पालकः "विश्वस्मात् "उत्तरः उत्कृष्टतरः "इन्द्रः “अपरं “चन अन्यद्भूतजातमिव "जरसा वयोहान्या "नहि "मरते न खलु म्रियते । यद्वा । इदं वृषाकपेर्वाक्यम् । तस्मिन् पक्षे त्वहमिति शब्दो वृषाकपिपरतया योज्यः । अन्यत्समानम् ॥

नाहमि॑न्द्राणि रारण॒ सख्यु॑र्वृ॒षाक॑पेर्ऋ॒ते ।

यस्ये॒दमप्यं॑ ह॒विः प्रि॒यं दे॒वेषु॒ गच्छ॑ति॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥ १२

न । अ॒हम् । इ॒न्द्रा॒णि॒ । र॒र॒ण॒ । सख्युः॑ । वृ॒षाक॑पेः । ऋ॒ते ।

यस्य॑ । इ॒दम् । अप्य॑म् । ह॒विः । प्रि॒यम् । दे॒वेषु॑ । गच्छ॑ति ।
विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥१२

न । अहम् । इन्द्राणि । ररण । सख्युः । वृषाकपेः । ऋते ।

यस्य । इदम् । अप्यम् । हविः । प्रियम् । देवेषु । गच्छति ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१२

हे “इन्द्राणि "अहम् इन्द्रः “सख्युः मम सखिभूतात् "वृषाकपेर्ऋते प्रियं वृषाकपिं विना “न "ररण न रमे । "अप्यम् अप्सु भवमद्भिर्वा संस्कृतं "प्रियं प्रीतिकरम् "इदम् उपस्थितं "हविः "देवेषु देवानां मध्ये “यस्य ममेन्द्रस्य सकाशं "गच्छति । यश्चाहम् "इन्द्रः "सर्वस्मात् "उत्तरः । यद्वा । अयमर्थः । हे इन्द्राणि वृषाकपेः सख्युरिन्द्रादृतेऽहं वृषाकपिर्न रारण न रमे । अन्यत्समानम् ॥

वृषा॑कपायि॒ रेव॑ति॒ सुपु॑त्र॒ आदु॒ सुस्नु॑षे ।

घस॑त्त॒ इन्द्र॑ उ॒क्षणः॑ प्रि॒यं का॑चित्क॒रं ह॒विर्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥१३

वृषा॑कपायि । रेव॑ति । सुऽपु॑त्रे । आत् । ऊ॒ इति॑ । सुऽस्नु॑षे ।

घस॑त् । ते॒ । इन्द्रः॑ । उ॒क्षणः॑ । प्रि॒यम् । का॒चि॒त्ऽक॒रम् । ह॒विः ।
विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥१३

वृषाकपायि ।रेवति ।सुऽपुत्रे ।आत् ।ऊं इति ।सुऽस्नुषे ।

घसत् ।ते ।इन्द्रः ।उक्षणः ।प्रियम् ।काचित्ऽकरम् ।हविः ।
विश्वस्मात् ।इन्द्रः ।उत्ऽतरः ॥१३

हे वृषाकपायि ।कामानां वर्षकत्वादभीष्टदेशगमनाच्चेन्द्रो वृषाकपिः ।तस्य पत्नि ।यद्वा ।वृषाकपेर्मम मातरित्यर्थः । “रेवति धनवति "सुपुत्रे शोभनपुत्रे "सुस्नुषे शोभनस्नुषे हे इन्द्राणि "ते तवायम् "इन्द्रः "उक्षणः सेचनसमर्थान् “आदु अनन्तरमेव । शीघ्रमेवेत्यर्थः ।पशून् “घसत् प्राश्नातु ।किंच “काचित्करम् ।कं सुखम् ।तस्याचित् संघः ।तस्करं हविः "प्रियम् इष्टं कुर्विति शेषः ।किंच ते पतिः “इन्द्रः “विश्वस्मात् “उतरः ।तथा च यास्कः - ‘ वृषाकपायि रेवति सुपुत्रे मध्यमेन सुस्नुषे माध्यमिकया वाचा । स्नुषा साधुसादिनीति वा साधुसानिनीति वा ।प्रियं कुरुष्व सुखाचयकरं हविः सर्वस्माद्य इन्द्र उत्तरः' (निरु.१२,९) इति ॥

उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् ।

उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः ॥
१४

उक्ष्णः ।हि ।मे ।पञ्चऽदश ।साकम् ।पचन्ति ।विंशतिम् ।

उत ।अहम् ।अद्मि ।पीवः ।इत् ।उभा ।कुक्षी इति ।पृणन्ति ।मे ।विश्वस्मात् ।इन्द्रः ।उत्ऽतरः ॥१४

उक्ष्णः ।हि ।मे ।पञ्चऽदश ।साकम् ।पचन्ति ।विंशतिम् ।

उत । अहम् । अद्मि । पीवः । इत् । उभा । कुक्षी इति । पृणन्ति । मे । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१४

अथेन्द्रो ब्रवीति । “मे मदर्थं “पञ्चदश पञ्चदशसंख्याकान् “विंशतिं विंशतिसंख्याकांश्च “उक्ष्णः वृषभान् "साकं सह मम भार्ययेन्द्राण्या प्रेरिता यष्टारः "पचन्ति । “उत अपि च अहमग्नि तान् भक्षयामि । जग्ध्वा चाहं "पीव “इत स्थूल एव भवामीति शेषः । किंच "मे मम “उभा उभौ “कुक्षी “पृणन्ति सोमेन पूरयन्ति यष्टारः । सोऽहम् "इन्द्रः "सर्वस्मात् "उत्तरः ॥

वृ॒ष॒भो न ति॒ग्मशृं॑ङ्गो॒ऽन्तर्यू॒थेषु॑ रोरु॑वत् ।

म॒न्थस्त॑ इन्द्र॒ शं हृ॒दे यं ते॑ सु॒नोति॑ भाव॒युर्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥ १५

वृ॒ष॒भः । न । ति॒ग्मऽशृ॑ङ्गः । अ॒न्तः । यू॒थेषु॑ । रोरु॑वत् ।

म॒न्थः । ते॒ । इ॒न्द्र॒ । शम् । हृ॒दे । यम् । ते॒ । सु॒नोति॑ । भा॒व॒युः । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥१५

वृषभः । न । तिग्मऽशृङ्गः । अन्तः । यूथेषु । रोरुवत् ।

मन्थः । ते । इन्द्र । शम् । हृदे । यम् । ते । सुनोति । भावयुः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१५

अथेन्द्राणी ब्रवीति । "तिग्मशृङ्गः तीक्ष्णशृङ्गः "वृषभो "न यथा वृषभः "यूथेषु गोसंघेषु “अन्तः मध्ये “रोरुवत् शब्दं कुर्वन् गा अभिरमयति तथा हे इन्द्र त्वं मामभिरमयेति शेषः । किंच “हे इन्द्र "ते तव "हृदे हृदयाय "मन्थः दध्नो मथनवेलायां शब्दं कुर्वन्

“शं शंकरो भवत्विति शेषः ।किंच "ते तुभ्यं "यं सोमं “भावयुः भावमिच्छन्तीन्द्राणी “सुनीति अभिषुणोति सोऽपि शंकरो भववित्यर्थः ।मम पतिः “इन्द्रः "विश्वस्मात् "उत्तरः ॥ ॥३ ॥

न सेशे यस्य रम्बंतेऽन्तरा सक्थ्या३ कपृंत् ।

सेदींशे यस्यं रोमशं निंषेदुषों विजृम्भंते विश्वंस्मादिन्द्र उत्तंरः ॥ १६

न ।सः ।ईशे ।यस्यं ।रम्बंते ।अन्तरा ।सक्थ्यां ।कपृंत् ।

सः ।इत् ।ईशे ।यस्यं ।रोमशम् ।निऽसेदुषः ।विऽजृम्भंते ।विश्वंस्मात् ।इन्द्रः ।उत्ऽतंरः ॥१६

न ।सः ।ईशे ।यस्य ।रम्बते ।अन्तरा ।सक्थ्या ।कपृत् ।

सः ।इत् ।ईशे ।यस्य ।रोमशम् ।निऽसेदुषः ।विऽजृम्भते ।विश्वस्मात् ।इन्द्रः ।उत्ऽतरः ॥१६

हे इन्द्र "सः जनः “न “ईशे मैथुनं कर्तुं नेष्टे न शक्नोति "यस्य जनस्य “कपृत् शेपः “सक्थ्या सक्थिनी “अन्तरा "रम्बते लम्बते । "सेत् स एव स्त्रीजने “ईशे मैथुनं कर्तुं शक्नोति “यस्य जनस्य “निषेदुषः शयानस्य "रोमशम् उपस्थं "विज़म्भते विवृतं भवति । यस्य च पतिः "इन्द्रः “विश्वस्मात् “उत्तरः ॥

न सेशे यस्यं रोमशं निंषेदुषों विजृम्भंते ।

सेदी॑शे॒ यस्य॒ रम्ब॑तेऽन्त॒रा स॒क्थ्या॒३ कपृ॒द्विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥
१७

न । सः । ई॒शे॒ । यस्य॑ । रो॒म॒शम् । नि॒ऽसे॒दुषः॑ । वि॒ऽजृम्भ॑ते ।

सः । इत् । ई॒शे॒ । यस्य॑ । रम्ब॑ते । अ॒न्त॒रा । स॒क्थ्या॑ । कपृ॑त् ।
विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥१७

न । सः । ईशे । यस्य । रोमशम् । निऽसेदुषः । विऽजृम्भते ।

सः । इत् । ईशे । यस्य । रम्बते । अन्तरा । सक्थ्या । कपृत् ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१७

“सः जनः “न "ईशे मैथुनं कर्तुं नेष्टे "यस्य जनस्य "निषेदुषः शयानस्य "रोमशम् उपस्थं “विजृम्भते विवृतं भवति । "सेत् स एव जनः “ईशे ईष्टे मैथुनं कर्तुं शक्नोति "यस्य जनस्य "कपृत् प्रजननं "सक्थ्या सक्थिनी “अन्तरा “रम्बते लम्बते । सिद्धमन्यत् । पूर्वोक्तव्यतिरेकोऽत्र द्रष्टव्यः । पूर्वस्यामृचि यियप्सुरिन्द्राणीन्द्रं वदति । अत्र त्वयियप्सुरिन्द्र इन्द्राणीं वदतीत्यविरोधः ॥

अ॒यमि॑न्द्र वृ॒षाक॑पि॒ः पर॑स्वन्तं ह॒तं वि॑दत् ।

अ॒सिं सू॒नां नवं॑ च॒रुमादेध॒स्यान॒ आचि॑तं॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥
१८

अ॒यम् । इ॒न्द्र॒ । वृ॒षाक॑पिः । पर॑स्वन्तम् । ह॒तम् । वि॒द॒त् ।

अ॒सिम् । सू॒नाम् । नव॑म् । च॒रुम् । आत् । एध॑स्य । अनः॑ ।
आऽचि॑तम् । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥१८

अयम् । इन्द्र । वृषाकपिः । परस्वन्तम् । हतम् । विदत् ।

असिम् । सूनाम् । नवम् । चरुम् । आत् । एधस्य । अनः ।
आऽचितम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ १८

हे "इन्द्र "अयं "वृषाकपिः "परस्वन्तं परस्वमात्मनो विषयेऽवर्तमानं "हतं हिंसितं "विदत् विन्दतु । तथा हतस्य विशसनाय "असिं शस्त्रं "सूनाम् उद्धानं पाकार्थं "नवं प्रत्यग्रं "चरुं भाण्डम् "आत् अनन्तरम् "एधस्य काष्ठस्य "आचितं पूर्णम् "अनः शकटं च विन्दतु । मस पतिः "इन्द्रः "विश्वस्मात् "उत्तरः ॥

अ॒यमे॑मि वि॒चाक॑शद्विचि॒न्वन्दास॒मार्य॑म् ।

पिबा॑मि पाक॒सुत्व॑नो॒ऽभि धीर॑मचाकशं॒ विश्व॑स्मा॒दिन्द्र॒ उत्त॑रः ॥१९

अ॒यम् । ए॒मि॒ । वि॒ऽचाक॑शत् । वि॒ऽचि॒न्वन् । दास॑म् । आर्य॑म् ।

पिबा॑मि । पा॒क॒ऽसुत्व॑नः । अ॒भि । धीर॑म् । अ॒चा॒क॒श॒म् ।
विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥१९

अयम् । एमि । विऽचाकशत् । विऽचिन्वन् । दासम् । आर्यम् ।

पिबामि । पाकऽसुत्वनः । अभि । धीरम् । अचाकशम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१९

अथेन्द्रो ब्रवीति । "विचाकशत् पश्यन् यजमानान् "दासम् उपक्षपयितारमसुरम् "आर्यम् अपि च "विचिन्वन् पृथक्कुर्वन् "अयम् अहमिन्द्रः "एमि यज्ञं प्रति गच्छामि । यज्ञं गत्वा च

“पाकसुत्वनः । पचतीति पाकः । सुनोतीति सुत्वा । हविषां पक्तुः सोमस्याभिषोतुर्यजमानस्य पाकेन विपक्केन मनसा सोमस्याभिषोतुर्वा यजमानस्य संबन्धिनं सोमं "पिबामि । तथा “धीरं धीमन्तं यजमानम् "अभि "अचाकशम् अभिपश्यामि । योऽहम् "इन्द्रः "विश्वस्मात् "उत्तरः ॥

धन्वं च यत्कृन्तत्रं च कर्ति स्वित्ता वि योजंना ।

नेदींयसो वृषाकपेऽस्तमेहिं गृहाँ उप विश्वंस्मादिन्द्र उत्तंरः ॥२०

धन्वं । च । यत् । कृन्तत्रंम् । च । कर्ति । स्वित् । ता । वि । योजंना ।

नेदींयसः । वृषाकपे । अस्तंम् । आ । इहि । गृहान् । उपं । विश्वंस्मात् । इन्द्रः । उत्ऽतंरः ॥२०

धन्व । च । यत् । कृन्तत्रम् । च । कति । स्वित् । ता । वि । योजना ।

नेदीयसः । वृषाकपे । अस्तम् । आ । इहि । गृहान् । उप । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२०

“धन्व निरुदकोऽरण्यरहितो देशः । "कृन्तत्रं कर्तनीयमरण्यम् । "यत् यत् "च “धन्व "च कृन्तत्रं च भवति । मृगोद्वासमरण्यमेवंविधं भवति न त्वत्यन्तविपिनम् । तस्य शत्रुनिलयस्यास्मदीयगृहस्य च मध्ये "कति "स्वित् “ता तानि “योजना योजनानि स्थितानि । नात्यन्तदूरे तद्भवतीत्यर्थः । अतः "नेदीयसः अतिशयेन समीपस्थाच्छत्रुनिलयात् हे "वृषाकपे त्वम् "अस्तम् अस्माकं गृहं “वि “एहि विशेषेणागच्छ । आगत्य च

"गृहान् यज्ञगृहान् "उप गच्छ । यतोऽहम् "इन्द्रः सर्वस्मादुत्कृष्टः ॥

पुन॒रेहिं वृषाकपे सुवि॒ता कंल्पयावहै ।

य ए॒ष स्वंप्न॒नंश॒नोऽस्त॒मेषिं प॒था पुन॒र्विश्वंस्मा॒दिन्द्र॒ उत्तंरः ॥२१

पुन॑ः । आ । इ॒हि॒ । वृ॒षा॒क॒पे॒ । सु॒वि॒ता । क॒ल्प॒या॒व॒है॒ ।

यः । ए॒षः । स्व॒प्न॒ऽनंशंनः । अस्तंम् । ए॒षिं । प॒था । पुन॑ः । विश्वंस्मात् । इन्द्र॑ः । उत्ऽतंरः ॥२१

पुनः । आ । इहि । वृषाकपे । सुविता । कल्पयावहै ।

यः । एषः । स्वप्नऽनंशनः । अस्तम् । एषि । पथा । पुनः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२१

आगत्य प्रतिगतं वृषाकपिमिन्द्रो ब्रवीति । हे "वृषाकपे त्वं "पुनरेहि अस्मान् प्रत्यागच्छ । आगते च त्वयि "सुविता सुवितानि कल्याणानि त्वच्चित्तप्रीतिकराणि कर्माणि "कल्पयावहै इन्द्राण्यहं च आवामुभौ पर्यालोच्य कुर्याव । किंच “यः स्वप्ननंशनः उदयेन सर्वस्य प्राणिनः स्वप्नानां नाशयिता आदित्यः सः “एषः त्वं “पथा मार्गेण “अस्तम् आत्मीयमावासं "पुनः “एषि गच्छसि । यतोऽहम् “इन्द्रः "विश्वस्मात् “उत्तरः । तथा च यास्कः - ‘ सुप्रसूतानि वः कर्माणि कल्पयावहै य एष स्वप्ननंशनः स्वप्नान्नाशयस्यादित्य उदयेन सोऽस्तमेषि पथा पुनः' (निरु. १२.२८) इति ॥

यदुदंञ्चो वृषाकपे गृहमि॒न्द्राजंगन्तन ।

क्व१॒ स्य पुंल्व॒घो मृगः कमंगञ्जन॒योपंनो॒ विश्वंस्मा॒दिन्द्र॒ उत्तंरः ॥
२२

यत् । उदंञ्चः । वृषा॒क॒पे॒ । गृहम् । इ॒न्द्र॒ । अजंगन्तन ।

क्वं । स्यः । पु॒ल्व॒घः । मृगः । कम् । अ॒ग॒न् । ज॒न॒ऽयोपंनः ।
विश्वंस्मात् । इन्द्रः॑ । उत्ऽतंरः ॥२२

यत् । उदञ्चः । वृषाकपे । गृहम् । इन्द्र । अजगन्तन ।

क्व । स्यः । पुल्वघः । मृगः । कम् । अगन् । जनऽयोपनः ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२२

गत्वा पुनरागतं वृषाकपिमिन्द्रः पृच्छति । हे “इन्द्र परमैश्वर्यवन् हे "वृषाकपे यूयम् "उदञ्चः उद्गामिनः सन्तो मद्गृहम् "अजगन्तन आगच्छ । एकस्यापि बहुवचनं पूजार्थम् । तत्र भवतः संबन्धी “पुल्वघः बहूनां भौमरसानामत्ता “स्यः सः "मृगः "क्व अभूत् "जनयोपनः जनानां मोदयिता मृगः "कं वा देशम् "अगन् अगच्छत् । सोऽहम् “इन्द्रः "विश्वस्मात् "उत्तरः । यद्वा इन्द्राणीवाक्यमिदम् । अत्र यास्कः---- ‘ यदुदञ्चो वृषाकपे गृहमिन्द्राजगमत क्व स्य पुल्वघो मृगः क्व स बह्वादी मृगः । मृगो मार्ष्टेर्गतिकर्मणः । कमगमद्देशं जनयोपनः ' (निरु. १३. ३ ) इति ॥

पर्शुंर्ह॒ नामं मान॒वी सा॒कं संसूव विंश॒तिम् ।

भ॒द्रं भ॑ल॒ त्यस्या॑ अभू॒द्यस्या॑ उ॒दर॒मामं॑य॒द्विश्वं॑स्मा॒दिन्द्र॒ उत्त॑रः ॥२३

पर्शुः॑ । ह॒ । नाम॑ । मा॒न॒वी । सा॒कम् । स॒सू॒व॒ । विं॒श॒तिम् ।

भ॒द्रम् । भ॒ल॒ । त्यस्यै॑ । अ॒भू॒त् । यस्याः॑ । उ॒दर॑म् । आम॑यत् । विश्व॑स्मात् । इन्द्रः॑ । उत्ऽत॑रः ॥२३

पर्शुः । ह । नाम । मानवी । साकम् । ससूव । विंशतिम् ।

भद्रम् । भल । त्यस्यै । अभूत् । यस्याः । उदरम् । आमयत् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२३

इन्द्रविसृज्यमानमनेन' मन्त्रेण वृषाकपिराशास्ते । हे "भल इन्द्रेण विसृज्यमान शर । भलतिर्भेदनकर्मा । "पर्शुः "नाम मृगी । "ह इति पूरणः । "मानवी मनोर्दुहितेयं "विंशतिं विंशतिसंख्याकान् पुत्रान् "साकं सह "ससूव अजीजनत् । "त्यस्यै तस्यै "भद्रं भजनीयं कल्याणम् "अभूत् भवतु । लोडर्थे लुङ । "यस्या "उदरमामयत् गर्भस्थैर्विंशतिभिः पुत्रैः पुष्टमासीत् । मम पिता "इन्द्रः "विश्वस्मात् "उत्तरः ॥ ॥ ४ ॥

## टिप्पणी

१०.८६.९

आख्यानं तु हये जाये विलापः स्यान्नदस्य मा ।
अवीरामात्मनः श्लाघा सुदेव इति तु स्पृहा ।।बृहद्देवता १.५३ ।।

वृषैष कपिलो भूत्वा यन्नाकमधिरोहति । वृषाकपिरसौ तेन विश्वस्मादिन्द्र उत्तरः । रश्मिभिः कम्पयन्नेति वृषा वर्षिष्ठ एव सः ।।६७ ।।

सायाह्नकाले भूतानि स्वापयन्नस्तमेति यत् । वृषाकपिरितो वा स्याद् इति मन्त्रेषु दृश्यते ।।बृहद्देवता २.६८ ।।

यदा तु वाग्भवत्येषा सूर्यामुं लोकमाश्रिता । तथा सूक्तमुषा भूत्वा सूर्या च भजतेऽखिलम् । ।७९ ।।

वृषाकपाय्यृचं भूत्वा सरण्यूर्दवे च ते ध्रुवम् । निपातमात्रं भजते द्युवच्च पृथिवी सती ।।बृहद्देवता २.८० ।।

वृषाकपिरुपरि पौराणिकसंदर्भाः

वृषाकपिरुपरि वैदिकसंदर्भाः

| | | | |
|---|---|---|---|
| | सूक्तं १०.८१ | सूक्तं १०.१२१ | सूक्तं १०.१६१ |
| २ | सूक्तं १०.८२ | सूक्तं १०.१२२ | सूक्तं १०.१६२ |
| ३ | सूक्तं १०.८३ | सूक्तं १०.१२३ | सूक्तं १०.१६३ |
| ४ | सूक्तं १०.८४ | सूक्तं १०.१२४ | सूक्तं १०.१६४ |
| ५ | सूक्तं १०.८५ | सूक्तं १०.१२५ | सूक्तं १०.१६५ |

# About this digital edition

This e-book comes from the online library Wikisource[1]. This multilingual digital library, built by volunteers, is committed to developing a free accessible collection of publications of every kind: novels, poems, magazines, letters...

We distribute our books for free, starting from works not copyrighted or published under a free license. You are free to use our e-books for any purpose (including commercial exploitation), under the terms of the Creative Commons Attribution-ShareAlike 3.0 Unported[2] license or, at your choice, those of the GNU FDL[3].

Wikisource is constantly looking for new members. During the realization of this book, it's possible that we made some errors. You can report them at this page[4].

The following users contributed to this book:

- Puranastudy
- ThomasBot
- Detlef108
- Shijualex

---

1. ↑ https://wikisource.org
2. ↑ https://www.creativecommons.org/licenses/by-sa/3.0
3. ↑ https://www.gnu.org/copyleft/fdl.html
4. ↑ https://wikisource.org/wiki/Wikisource:Scriptorium